**शाब्दतरङ्गिणी (पृ.37)**
**शाब्दबोधविचारोपयोगिनां मौलिकानां शास्त्रार्थानां तत्तन्मतभेदसूची**

| 1 | **2** | 3 | 4 | 5 | 6 | 7 | 8 |
|---|---|---|---|---|---|---|---|
| | | **वैयाकरणाः** | | **मीमांसकाः** | | **नैयायिकाः** | **इतरे** |
| | **शास्त्रार्थः** | **प्राचीनाः** | **नवीनाः** | **भाट्टाः** | **प्राभाकराः** | | |
| 1 | **वाक्यार्थबोधे करणम्** | स्फोटः | स्फोटः | पदैरभिहिताः पदार्थाः । | अन्वितार्थे शक्तानि पदानि । | तत्तत्स्वार्थे शक्तानि पदानि आकाङ्क्षादिसहकारेण पदार्थ-स्मृतिद्वारा वाक्यार्थबोधे करणम् । | |
| 2 | **शक्तिः (अभिधा)** | शब्दगतम् अनादिबोधकत्वं बोधजनकतावच्छेदक-विषयिताकत्व-पर्यवसितम् | शब्दार्थतादात्म्येनोपकृतः वाच्यवाचकभावाख्यः अतिरिक्तः संबन्धः । तादात्म्यमपि शक्त्युपकारक-त्वात् शक्तिरिति व्यपदिश्यते। | पदपदार्थयोः स्वाभाविकः संबन्धः नित्यः । | पदानामर्थबोधे सामर्थ्यम् । जातौ स्मारकशक्तिः । अन्वितेऽर्थे आनुभाविकी शक्तिः । | अवश्यज्ञेयः समयः संकेतः । नित्यः ईश्वरसंकेतः शक्तिः । अनित्यः आधुनिकसंकेतः परिभाषा । संकेतः - इच्छा । | बोधानुकूलशक्तिमत्पदस्य ज्ञानं संस्कारो वा अभिधा इति **काव्यप्रदीपकाराः** । शक्त्या प्रतिपादकत्वम् अभिधा इति **वृत्तिवार्तिककृतः**। |
| 3 | **एकार्थीभावः** | समासे विशिष्टार्थे शक्तिः । | समासे अजहत्स्वार्थी वृत्तिः । | वाक्ये इव समासेऽपि व्यपेक्षैव, नैकार्थीभावः । | | शक्तिः पदमात्रवृत्तिः, समासे पदसमुदाये न शक्तिः । | |
| 4 | **लक्षणा** | सर्वे सर्वार्थवाचकाः । लक्षणा वृत्तिर्नास्ति । प्रयोगप्राचुर्य-तदभावाभ्यां शक्तिरिति लक्षणेति च व्यवहारः । | सर्वेषां शब्दानां सर्वार्थवाचक-त्वात् शक्यत्वेन प्रसिद्धान्य-बोधौपयिकः व्यक्तिविशेष-बोधौपयिकश्च शक्तिविशेषः । | वाक्यार्थबोधानुकूलः पदार्थ-संबन्धः । अन्वयनिष्ठं पदार्थ-प्रतियोगिकत्वं लक्षणेति, वाक्यार्थः लक्ष्यः इत्युच्यते । | वाक्यार्थान्वयिगतपदार्थसंबन्धः । वाक्येऽपि लक्षणा अस्ति । | शक्यसंबन्धः । पदमात्रवृत्तिः । | अर्थगतः बोधानुकूलः शब्दे आरोप्यते । लक्षणा आरोपिता क्रिया इति **काव्यप्रकाशकाराः** । मुख्यार्थसंबन्धेन प्रतिपादक-त्वमिति **वृत्तिवार्तिककाराः** । शक्यादशक्योपस्थितिरिति अशक्ये तात्पर्यमिति च **नैयायिकैकदेशिनः** । |
| 5 | **लाक्षणिकबोधः** | | शक्यतावच्छेदक-गङ्गात्वादि-रूपेण लक्ष्यतीरादिबोधः आहार्यारोपः । | | | पदात् लक्ष्यतावच्छेदकरूपेणोप-स्थापितस्य तेनैव रूपेण शाब्दबोधः । | लक्षणया तीरत्वेनोपस्थितस्य गङ्गात्वेन शाब्दबोधः इति **रसगङ्गाधरकाराः** । |
| 6 | **व्यञ्जना** | | शब्दतदर्थादिसाधारणः व्यापारविशेषः । | | व्यङ्ग्याभिमतेऽपि शब्दस्य अभिधैव इषोरिव दीर्घ-दीर्घतरो व्यापारः न व्यञ्जना । | शक्त्या, लक्षणया, मनसा वा व्यङ्ग्याभिमतस्यार्थस्य प्रतीतिः । व्यञ्जनावृत्तिरस्ति । | काव्यजीवातुरसप्रतीतये शब्दार्थ-साधारणी व्यञ्जना आवश्यकीति **आलङ्कारिकाः** । |
| 7 | **सुबर्थः** | आश्रयः, अवधिः, उद्देश्यः, संबन्धश्च । अभेदेन प्रकृत्यर्थान्वितः सुबर्थः धात्वर्थेऽन्वेति । शक्तिपक्षे आश्रयत्वादिकं सुबर्थः । | कर्मीभूत-ग्रामादिः सुबन्तार्थः धात्वर्थान्वयी । | अखण्डं कर्मत्वादिकं सुबर्थः । तत्रैव सुबर्थसंख्या अन्वेति । सुबर्थः परम्परासंबन्धेन भावनायामन्वेति । | | कर्मत्वमाधेयत्वपर्यवसितं द्वितीयार्थः साक्षात्संबन्धेन धात्वर्थफलान्वयी । सुबर्थ-संख्या प्रकृत्यर्थे विशेषणम् । | |
| 8 | **धात्वर्थः** | फलं व्यापारश्च सर्वधातूनाम् अर्थः । | कृतिपर्यन्तव्यापारो धात्वर्थः । फलावच्छिन्नव्यापारः व्यापारवच्छिन्नफलञ्च धात्वर्थः । | फलावच्छिन्नव्यापारः धात्वर्थः । कृतिः न धात्वर्थान्तर्भूता । | | सकर्मकधातूनां फलावच्छिन्न-व्यापारोऽर्थः । फलं व्यापारश्च अर्थः इति शण्डशक्तिपक्षः । कृतिः न धात्वर्थः । अकर्मकाणां व्यापारमात्रमर्थः । | फलमात्रं धात्वर्थः इति **मण्डन-मिश्राः** । व्यापारमात्रं धात्वर्थः इति **प्राचीननैयायिकाः** । |
| 9 | **तिङर्थः** | आश्रयः । धात्वर्थे विशेषणम् । | अखण्डकर्तृत्वकर्मत्वादिमान् । | कृतिः - भावना धात्वर्थस्य विशेष्यभूता । निरूढलक्ष्यः अखण्डकर्तृत्वादिमानपि भावनायामन्वेति । | | कृतिः शक्यार्थः । आश्रयत्वं प्रतियोगित्वं च निरूढलक्ष्यः प्रथमान्तार्थे विशेषणम् । | व्यापारः इति **मण्डनमिश्राः** । |

| | | | | | |
|---|---|---|---|---|---|
| 10 **लकारार्थकालः** | धात्वर्थान्वयी । | | तिङर्थभावनान्वयी । | | तिङर्थकृतौ, आश्रयत्वादेः तिङर्थतास्थले धात्वर्थे चान्वेति । |
| 11 **लिङर्थः** | इष्टसाधनत्वम् । | प्रेरणात्वरूपाखण्डधर्मवान् । | प्रवृत्त्यनुकूलो व्यापारः प्रवर्तना । | नियोगः । | बलवदनिष्टाननुबन्धित्वसहितमिष्टसाधनत्वं, कृतिसाध्यत्वञ्च |
| 12 **वाक्यार्थबोधे मुख्यविशेष्यः** | धात्वर्थो व्यापारः । सोऽपि नञ्समभिव्याहारे, नञर्थाभावे विशेषणम् । | धात्वर्थः । कर्त्राख्याते व्यापारः, कर्माख्याते फलञ्च विशेष्यतया भासते । | आख्यातार्थभावना । | | प्रायः प्रथमान्तार्थः, क्वचित् निपातार्थः, अन्यत्र धात्वर्थः, अपरत्र आख्यातार्थश्च । |